



श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री विष्णु रक्षा स्तोत्रम्

***shrI viShNu rakShA stotram***

# श्री विष्णु रक्षा स्तोत्रम्

**श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी । वेदान्तचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥**

हेयातीतो मेयातीतो मायातीतो ज्ञेयातीतः ।
गेयातीतो ध्येयातीतः पायाद्विष्णुर्-जायोपेतः ॥ [1]

वेदातीतो देवातीतो योगातीतो यागातीतः ।
शर्वातीतस्-सर्वातीतः पायाद्विष्णुर्-जायोपेतः ॥ [2]

नादातीतो बोधातीतो मेधातीतो वादातीतः ।
भावातीतो भोगातीतः पायाद्विष्णुर्-जायोपेतः ॥ [3]

मानातीतो गानातीतो ज्ञानातीतो ध्यानातीतः ।
नानातीतो भानातीतः पायाद्विष्णुर्-जायोपेतः ॥ [4]

ब्रह्माधीशो भर्गाधीशो पाकारीशः सर्वाधीशः ।
देवाधीशो देहाधीशः पायाद्विष्णुर्-जायोपेतः ॥ [5]

अन्नेकोशे प्राणेकोशे स्वान्तेकोशे ज्ञानेकोशे ।
नन्देकोशे शायीमायी पायाद्विष्णुर्-जायोपेतः ॥ [6]

मन्त्राधीशस्-तन्त्राधीशो यन्त्राधीशः कालाधीशः ।
ज्वालाधीशः सूर्याधीशः पायाद्विष्णुर्-जायोपेतः ॥ [7]

भक्त्यागम्यो विद्यागम्यो मूर्त्यारम्यः कीर्त्यारम्यः ।
भक्ते भृत्यः भावेमर्त्यः पायाद्विष्णुर्-जायोपेतः ॥ [8]

# श्री विष्णु रक्षा स्तोत्रम्

जीवैर्भारे न्यस्ते धीरैः कामी स्वामी कम्पा युक्तः ।
औत्सुक्यात्तं सोढुं यत्तः पायाद्विष्णुर्-जायोपेतः ॥ [9]

क्षीरे नीरे नद्यास्तीरे मध्ये मेध्ये वाद्ये खाद्ये ।
वीरे वादे वासी भासी पायाद्विष्णुर्-जायोपेतः ॥ [10]

अग्नौ सूर्ये आर्ये कार्ये वाते मेघे जाते वर्षे ।
हर्षेऽघाते नद्यां तिष्ठन् पायाद्विष्णुर्-जायोपेतः ॥ [11]

गोभिर्गोपैर्-गोपी ग्रामैः गोत्राद्वृष्टे त्रातुं वीतः ।
भक्ते भक्ते भक्तो रक्तः पायाद्विष्णुर्-जायोपेतः ॥ [12]

ज्योत्स्नारामे यम्याः कुञ्जे रासे लास्ये हास्ये दास्ये ।
रङ्क्तः पथ्या रन्तुं सक्तः पायाद्विष्णुर्-जायोपेतः ॥ [13]

श्रावं श्रावं वेणू नादं भावे भावं याचे सत्यम् ।
इत्याचष्टे गोपीश्यामा पायाद्विष्णुर्-जायोपेतः ॥ [14]

नित्यप्रीतो मुक्तप्रीतः सक्तप्रीतः सत्यप्रीतः ।
भक्तिप्रीतो मुक्तिप्रीतः पायाद्विष्णुर्-जायोपेतः ॥ [15]

कालाधारो लोकाधारो वेलाधारो मूलाधारः ।
भूताधारस्-सर्वाधारः पायाद्विष्णुर्-जायोपेतः ॥ [16]

श्रुत्याधारस्-मृत्याधारो वृत्याधारो भक्त्याधारः ।
नत्याधारो मुक्त्याधारः पायाद्विष्णुर्-जायोपेतः ॥ [17]

# श्री विष्णु रक्षा स्तोत्रम्

हेमातीतः प्रेमातीतो व्योमातीतो भूमातीतः ।
वीशं कीशं मेशो ईष्टे पायाद्विष्णुर्-जायोपेतः ॥ [18]

चित्तेऽचित्ते चित्ते रूपं ध्यात्वा सोहं धूत्वा मोहम् ।
त्वामेवान्ते सन्तं याचे पायाद्विष्णुर्-जायोपेतः ॥ [19]

कीट्या धृत्या दिष्ट्यासृष्टं नीत्यारीत्या प्रीत्यापुष्टाम् ।
विद्युन्मालां नत्याजुष्टां सेवेद्योतं पायाद्विष्णुः ॥ [20]

**कवितार्किक-सिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥**